रघुवंशे
उपोद्घातः

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १॥

क्वसूर्यप्रभवोवंशः क्वचाल्पविषयामतिः ।
तितिर्षुर्दुस्तरम् मोहाद्दुडूपेनापि सागरम् ॥ २॥

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फलेलोभादुद्बाहुरिववामनः ॥ ३॥

अथवा कृतवाग्द्वारे वंशेस्मिन् पूर्वसूरिभिः ।
मणौवज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४॥

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५॥

यथाविधिहुताग्नीनाम् यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानाम् यथाकालप्रबोधिनाम् ॥ ६॥

दानार्थे सम्भृतार्थानाम् सत्यायमितभाषिणाम् ।
यशसेविजिगिषूणाम् प्रजायैगृहमेधिनाम् ॥ ७॥

शैशवेऽभ्यस्तविद्यानाम् यौवनेविषयैशिणाम् ।
वार्द्धके मुनिवृत्तीनाम् योगेनान्तेतनुत्यजाम् ॥ ८॥

रघूणामन्वम् वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तैर्गुणैर्कर्णमागत्य चापलायप्रचोदितः ॥ ९॥

तम् सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः शामिकापिवा ॥ १०॥